एकादशः पाठः **11** **Lesson – 11**

# राजधर्मः

अयं पाठ्यभागः 'यादवाभ्युदयम्' इति ग्रन्थात् स्वीकृतः । अस्य प्रणेता श्रीवेदान्तदेशिकः। अयं ग्रन्थः कृष्णस्य चरितं वर्णयति। ग्रन्थोऽयं चतुर्विंशतिसर्गात्मकः भवति । अत्र (अस्मिन् पाठ्यभागे) चन्द्रवंशोत्पन्नानां केषाञ्चन राज्ञां चरितं वर्णितमस्ति ।

## नहुषः-



बभूव नहुषः तस्मिन्, ऐरावत इवाम्बुधौ ।
यमिन्द्रविगमे देवाः, पदे तस्य न्यवीविशन् ॥ 1
नरेन्द्राः पृथिवीचक्रे, नामचिह्नैरलङ्कृताः ।
जङ्गमास्तस्य वीरस्य, जयस्तम्भा इवाभवन् ॥ 2
शक्तिरप्रतिघा तस्य, शात्रवैरपि तुष्टुवे ।
यथावत् साधकस्येव, यावदर्था सरस्वती ॥ 3

## ययातिः-



वीरो रस इवोत्साहात्, नहुषादभ्यजायत ।
ययातिर्नाम येनैन्द्रं, अर्धासनमधिष्ठितम् ॥ 4
तटाकमिव तापार्ताः, तमिन्द्रमिव निर्जराः ।
भावा इव रसं भव्याः, पार्थिवाः पर्युपासत ॥ 5

## यदुः-

यदुर्नाम ततो जज्ञे, यत्सन्ततिसमुद्भवैः ।
समानगणनालेख्ये, निस्समानैर्निषिद्यते ॥ 6



Unit 11.indd 73 06-06-2018 12:44:22

अपुनः प्रार्थनीयस्य, प्रार्थिताधिकदायिनः ।
अर्थिनः प्रथमे तस्य, चरमान् पर्यपूरयन् ।। 7



शराणां शात्रवाणां च, सन्धानेन महौजसः ।
तस्य निर्धूतलक्षेण, द्विःक्वचिन्नाप्यभूयत ।। 8
युक्तदण्डममित्राणां, कृतान्तं समवर्तिनम् ।
दक्षिणं लोकपालं तं, अमन्यन्त दिवौकसः ।। 9
यशः प्रसूनसुरभिः, यदुसन्तानपादपः ।
बभूव विबुधप्रीत्यै, बहुशाखः क्षमातले ।। 10

- यादवाभ्युदये प्रथमः सर्गः

कविपरिचयः- 'यादवाभ्युदयम् ' इति ग्रन्थः श्रीवेदान्तदेशिकेन प्रणीतः । अस्य पिता अनन्तसूरि नामकः, माता च तोताम्बा नाम्नी । अस्य जन्म काञ्चीपूरे ई.1268 वर्षे बभूव । अयं स्वमातुलस्य आत्रेय-रामानुजस्य सकाशे अध्ययनं कृतवान्। अनेन शताधिकतमाः ग्रन्थाः विरचिताः । अनेन कवितार्किकसिंहः इत्यादीनि बिरुदानि प्राप्तानि ।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. अम्बुधौ – in milky ocean
2. नरेन्द्राः, पार्थिवाः – kings
3. अलङ्कृताः – decorated
4. चिह्नैः – by identification marks
5. स्तम्भाः – pillars
6. शक्तिः – strength
7. शात्रवैः – by the enemies
8. तटाकम् – pond
9. तापार्ताः – heat
10. निर्जराः, दिवौकसः – gods
11. पादपः – tree
12. आलेख्ये – in the picture
13. अर्थिनः – beggars
14. शराणाम् – of arrows
15. अमित्राणाम् – of enemies
16. दिवौकसः – gods



Unit 11.indd 74 06-06-2018 12:44:22

## II.अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. बभूव – लिट् – प्रथमपुरुषः, एकवचनम्  of भू to be
2. तस्मिन् – सप्तमी विभक्तिः, एकवचनम् of तद् (पुं) शब्दः
3. अभवन् – लङ् - प्रथमपुरुषः, बहुवचनम् of भू to be
4. अजायत – लङ् - प्रथमपुरुषः, एकवचनम् of जन् (जा) to took birth
5. जज्ञे – लिट् - प्रथमपुरुषः, एकवचनम् of जन् (जा) to took birth
6. प्रत्युवाच – लिट् - प्रथमपुरुषः, एकवचनम् of वद् with प्रति to reply
7. अभूयत – लङ् - प्रथमपुरुषः, एकवचनम् of भू to be
8. अमन्यन्त – कर्मणि लङ् - प्रथमपुरुषः, बहुवचनम् of मन् to think

## III. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

1. इवाम्बुधौ = इव + अम्बुधौ
2. चिह्नैरलंकृताः = चिह्नैः + अलंकृताः
3. जङ्गमास्तस्य = जङ्गमाः + तस्य
4. इवाभवन् = इव + अभवन्
5. शक्तिरप्रतिघा = शक्तिः + अप्रतिघा
6. शात्रवैरपि = शात्रवैः + अपि
7. ययातिर्नाम = ययातिः + नाम
8. तटाकमिव = तटाकम् + इव
9. अप्यभूयत = अपि + अभूयत
10. पर्युपासत = परि + उपासत

## IV. अधो लिखितानां पदानां विग्रहं लिखत-

1. इन्द्रविगमे – ________________
2. पृथिवीचक्रे – ________________
3. अप्रतिघा – ________________
4. निर्जराः – ________________
5. अर्धासनम् – ________________
6. अपुनः – ________________
7. महौजसः – ________________
8. दिवौकसः – ________________
9. विबुधप्रीत्यै – ________________



Unit 11.indd 75 06-06-2018 12:44:22

## V. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. अम्बुधौ – सागरे
2. पदे – स्थाने
3. नरेन्द्राः – राजानः
4. अलङ्कृताः– विभूषिताः
5. शक्तिः – बलम्
6. शात्रवैः – रिपुभिः
7. तटाकम् – जलाशयम्
8. निर्जराः – देवाः
9. आलेख्ये – चित्रे
10. अर्थिनः – याचकान्
11. शराणाम् – बाणानाम्
12. पादपः – तरुः

## VI. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

1. देवाः x असुराः
2. शक्तिः x अशक्तिः
3. अप्रतिघा x प्रतिघा
4. शात्रवैः x मित्रैः
5. निस्समानैः x समानैः
6. अमित्राणाम् x मित्राणाम्
7. दक्षिणम् x वामम्
8. यशः x अयशः
9. सुरभिः x असुरभिः
10. प्रीत्यै x अप्रीत्यै

## VII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. नहुषः कथं बभूव ?
2. नहुषस्य वीरं वर्णयत।
3. नहुषः शात्रवैः कथं तुष्टुवे ?
4. ययातिः कथम् अभ्यजायत ?
5. पार्थिवाः ययातिं कथं पर्युपासत ?
6. यदोः जन्म कथम् अभवत् ?
7. यदोः दानशीलता कथम् आसीत् ?
8. यदौः शौर्यं कीदृशम् ?
9. देवाः यदुं किमिति अमन्यन्त ?
10. यदुसन्तानपादपः क्षमातले किमर्थं बभूव ?

## VIII. सविस्तरम् उत्तरं लिखत-

1. नहुषस्य ययातेः च महत्वं लिखत।
2. यदुमहाराजं यथाग्रन्थं वर्णयत।

## IX. श्लोकान् आधृत्य रिक्तस्थानानि पूरयत-

1. बभूव नहुषः तस्मिन् ________ इवाम्बुधौ।
2. यथावत् साधकस्येव, यावदर्था _______ ।
3. ______ येनैन्द्रं अर्धासनमधिष्ठितम् ।
4. तटाकमिव _______तमिन्द्रमिव निर्जराः ।
5. दक्षिणं लोकपालं तं अमन्यन्त ______ ।

## X. कोष्ठात् उचितं पदं चित्वा रिक्तस्थानं पूरयत-

1. नहुषं पदे तस्य न्यवीविशन् ________ (देवाः / असुराः )
2. वीरो रस इव उत्साहात् नहुषात् ______ (नहुषः / ययातिः) अभ्यजायत ।
3. निर्जराः _____पर्युपासत (इन्द्रम् / तटाकम्)
4. दक्षिणं लोकपालं तं अमन्यन्त ______ (दानवाः / दिवौकसः)
5. समानगणनालोख्ये ______ निषद्यते (समानैः / निस्समानैः )

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### कर्तृविस्तारः – वेदान्तदेशिकः

अस्य वेङ्कटनाथः इति नाम प्रकृतिसिद्धं भवति । एषः स्वस्य एकविंशतितमे वयसि कनकवल्लीं परिणीतवान्। सप्तविंशति तमे वयसि वैष्णवगुरुस्थितिं प्राप्तवान्। ततः स्वगुरोः किडाम्बी अप्पुल्लारः आज्ञया कडलूरु पार्श्वे स्थितं तिरुवहीन्ध्रपुरम् गत्वा जीवयामास । एषः तिरुप्पति, मेल्कोट्टै, काञ्चीपुरम्, अयोध्या इत्यादीनि स्थानानि गत्वा जगद्गुरूणां श्रीरामानुजाचार्याणां तत्वानि अप्रचारयत्। अन्ते स्वपुत्रेण कुमारवरददेशिकेन साकं श्रीरङ्गे उषितवान्। एषः 101 वर्षाण्यावत् अजीवयत् ।

अनेन प्रायः विंशत्यधिशतसंख्याकाः ग्रन्थाः विरचिताः । तमिल्भाषा, संस्कृतभाषा, मणिप्रवालम् (उभयमिश्रितम्) इति पद्धत्या ग्रन्थान् रचितवान् । अत्र कतिपयेषां ग्रन्थानां नाम लिख्यते यथा –



Unit 11.indd 77 06-06-2018 12:44:22

| संस्कृतम् | तमिलभाषा | मणिप्रवालम् |
|---|---|---|
| पादुकासहस्रम् | अडैक्कलप्पत्तु | अमृतरञ्जनिरहस्यम् |
| अधिकरणसारावलिः | मुम्मणिक्कोवै | अञ्जलिप्रभावः |
| यादवाभ्युदयम् | नवमणिमालै | गुरुपरम्परासारः |
| हंससन्देशः | चरमश्लोकसुरुक्कु | आराधनकारिका |
| गोदास्तुतिः | पन्निरुणामम् | मुनिवाहनभोगः |
| गोपालविंशतिः | तिरुच्चिन्नमालै | |

तेन विरचितेषु ग्रन्थेषु यादाभ्युदयं तु महाकाव्यं भवति। हंससन्देशः खण्डकाव्यं भवति। एषः सङ्कल्पसूर्योदयम् इति नाटकमपि रचितवान्।

### राजनीतिः -

पर्जन्य इव भूतानां आधारः पृथिवीपतिः।
विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥
यः कुलाऽभिजनाऽऽचारैः अतिशुद्धः प्रतापवान्।
धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि॥
यथा सर्वाणि भूतानि धरा धारयते समम्।
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ॥
पाषण्डनैगमश्रेणीं पूगव्रातगणादिषु।
संरक्षेत् समयं राजा दुर्गे जनपदे तथा ॥
अहं वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः।
स संहत्य निहन्तव्यः श्वेव सोन्माद आतुरः ॥
प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।
नात्मप्रियं हितं प्रजानां तु प्रियं हितम् ॥

### नहुषकथा–

एकदा इन्द्रः त्वष्टुप्रजापतेः अपत्यं हत्वा ब्रह्महत्यादोषात् नष्टप्रभावः स्वपदं त्यक्त्वा किञ्चित्कालं कुत्रचित् लीनः आसीत्। तस्मिन् काले अन्ये देवाः सम्भूय भुवि राज्यं पालयन्तं नहुषं क्रतुशतयाजिनं तत्पदोचितं विचिन्त्य तस्य पदे तम् अभ्यषेचयन् इति महाभारतकथा।

Weblink : 1. swamydesika.tripod.com



Unit 11.indd 78 06-06-2018 12:44:23